# Gomahimavarnanam

# ગોમહિમાવર્ણનમ્

## Document Information

Text title : Gomahimavarnanam

File name : gomahimAvarNanam.itx

Category : devii, devI, bhaviShyapurANa

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : bhaviShyapurANa | uttarabhAga | adhyAya 69/24-37||

Latest update : October 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 4, 2024

*sanskritdocuments.org*

# ગોમહિમાવર્ણનમ્

ગોષુ યજ્ઞાઃ પ્રવર્તન્તે ગોષુ દેવાઃ પ્રતિષ્ઠિતાઃ ।
ગોષુ વેદાઃ સમુત્કીર્ણાઃ સષડઙ્ગપદક્રમાઃ ॥ ૨૪॥

શ‍ૃઙ્ગમૂલે ગવાં નિત્યં બ્રહ્મા વિષ્ણુશ્ચ સંસ્થિતૌ ।
શ‍ૃઙ્ગાગ્રે સર્વતીર્થાનિ સ્થાવરાણિ ચરાણિ ચ ॥ ૨૫॥

શિવો મધ્યે મહાદેવઃ સર્વકારણકારણમ્ ।
લલાટે સંસ્થિતા ગૌરી નાસાવંશે ચ ષણ્મુખઃ ॥ ૨૬॥

કમ્બલાશ્વતરૌ નાગૌ નાસાપુટસમાશ્રિતૌ ।
કર્ણયોરશ્વિનૌ દેવૌ ચક્ષુર્ભ્યાં શશિભાસ્કરૌ ॥ ૨૭॥

દન્તેષુ વસવઃ સર્વે જિહ્વાયાં વરુણઃ સ્થિતઃ ।
સરસ્વતી ચ કુહરે યમયક્ષૌ ચ ગણ્ડયોઃ ॥ ૨૮॥

સન્ધ્યાદ્વયં તથોષ્ઠાભ્યાં ગ્રીવાયાં ચ પુરન્દરઃ ।
રક્ષાંસિ કકુદે દ્યૌશ્ચ પાર્ષ્ણિકાયે વ્યવસ્થિતા ॥ ૨૯॥

ચતુષ્પાત્સકલો ધર્મો નિત્યં જઙ્ઘાસુ તિષ્ઠતિ ।
ખુરમધ્યેષુ ગન્ધર્વાઃ ખુરાગ્રેષુ ચ પન્નગાઃ ॥ ૩૦॥

ખુરાણાં પશ્ચિમે ભાગે રાક્ષસાઃ સમ્પ્રતિષ્ઠિતાઃ ।
રુદ્રા એકાદશ પૃષ્ઠે વરુણઃ સર્વસન્ધિષુ ॥ ૩૧॥

શ્રોણીતટસ્થાઃ પિતરઃ કપોલેષુ ચ માનવાઃ ।
શ્રીરપાને ગવાં નિત્યં સ્વાહાલઙ્કારમાશ્રિતાઃ ॥ ૩૨॥

આદિત્યા રશ્મયો વાલાઃ પિણ્ડીભૂતા વ્યવસ્થિતાઃ ।
સાક્ષાદ્ગઙ્ગા ચ ગોમૂત્રે ગોમયે યમુના સ્થિતા ॥ ૩૩॥

ત્રયસ્ત્રિંશદ્દેવકોટ્યો રોમકૂપે વ્યવસ્થિતાઃ ।
ઉદરે પૃથિવી સર્વા સશૈલવનકાનના ॥ ૩૪॥

ચત્વારઃ સાગરાઃ પ્રોક્તા ગવાં યે તુ પયોધરાઃ ।
પર્જન્યઃ ક્ષીરધારાસુ મેઘા બિન્દુવ્યવસ્થિતાઃ ॥ ૩૫॥

જઠરે ગાર્હપત્યોઽગ્નિર્દક્ષિણાગ્નિર્હૃદિ સ્થિતઃ ।
કણ્ઠે આહવનીયોઽગ્નિઃ સભ્યોઽગ્નિસ્તાલુનિ સ્થિતઃ ॥ ૩૬॥

અસ્થિવ્યવસ્થિતાઃ શૈલા મજ્જાસુ ક્રતવઃ સ્થિતાઃ ।
ઋગ્વેદોઽથર્વવેદશ્ચ સામવેદો યજુસ્તથા ॥ ૩૭॥

ઇતિ ભવિષ્યપુરાણે ઉત્તરપર્વણિ એકોનસપ્તત્યધ્યાયાન્તર્ગતં
ગોમહિમાવર્ણનં સમાપ્તમ્ ।

ભવિષ્યપુરાણ । ઉત્તરભાગ । અધ્યાય ૬૯/૨૪-૩૭॥

bhaviShyapurANa . uttarabhAga . adhyAya 69/24-37..

Proofread by PSA Easwaran

---

*Gomahimavarnanam*

pdf was typeset on October 4, 2024

Please send corrections to *sanskrit@cheerful.com*